श्रीपद्मनंदिआचार्यविरचित

अनित्यपंचाशत ।

संस्कृत टीकासहित

तेनो

हिराचद नेमचंद ए

गुजराती भावार्थ लखीने

सोलापूरमां "श्रीदत्तप्रसाद" स्टीम प्रेसमां छपाव्यो.

बीजी आवृत्ति. प्रति १,०००.

संवत् १९६७. सन १९११.

किंमत बे आना.

सोलापूर शुक्रवारपेठ येथ "श्रीदत्तप्रसाद" छापखान्यांत
महादेव हरि दणगे यांनीं छापिलें

अनित्यपंचाशत्

जयति जिनोधृतिधनुषामिषुमाला भवति
योगियोधानां ॥ यद्वाक्करुणामय्यापि मोह-
रिपुप्रहतये तीक्ष्णा ॥ १ ॥

टीका–जिनः जयति। यद्वाक् यस्य जिनस्य वाक् वाणी धृति-धनुषां धैर्यधनुर्युक्तानां योगियोधानां योगिसुभटानां इषुमाला भवति शरमाला भवति बाणपंक्तिः भवति । किंलक्षणा वाणी करुणामयी दयायुक्ता अपि मोहरिपुप्रहतये तीक्ष्णा ।

अर्थ—जिनेश्वर प्रभू जयवंत हजो. जेहनी वाणी धैर्यरूपी धनुषने धारण करनारां योगीरूपी शूरवीर पुरुषने बाणनी पंक्तिरूपी थायछे. ए वाणी दयामयी छे तो पण मोहरूपी शत्रूने हणवामाटे बहु जोरदार छे.

यद्येकत्र दिने न भुक्तिरथवा निद्रा न रात्रौ भवेत्
विद्रात्यंबुजपत्रवद्दहनतोभ्याशास्थिताद्य ध्रुवम् ॥
अस्त्रव्याधिजलादितोपि सहसा यच्च क्षयं गच्छति
भ्रातः कात्र शरीरके स्थितिमतिर्नाशेऽस्य को विस्मयः ॥

टीका–यद्यस्मात् एकत्रदिने भुक्तिः न कृता भोजनं न कृतं तदा रात्रौ निद्रा न भवेत् निद्रा न आगच्छाति यत् शरीरं ध्रुवं विद्राति म्लानं गच्छति । किंवत् दहनतः अभ्याशस्थितात् समीपस्थितात् अग्नितः यथा अंबुजपत्रवत् अग्नितः कमलवत् च पुनः यत् शरीरं शस्त्रव्याधिजलादिसंयोगतः अपि सहसा क्षयं विनाशं गच्छति । भो भ्रातः अत्र शरीरे स्थितिमतिः शाश्वतीबुद्धिः का न कापि । अस्य शरीरस्य नाशे सति कः विस्मयः ।किं आश्चर्यम् ।

अर्थ—जो एक दाहडो आ शरीरने खावानूं नहीं आप्युं तो रातनां ऊंघ आवती नथी. अने जेम अग्नीना नजीक कमळनूं पानडूं मूकिये तो ते करमाई जायछे तेम आ शरीर करमाई जायछे. आ शरीरने जो शस्त्रनो प्रहार थयो अथवा तेमां व्याधी उत्पन्न थयां अथवा ते जळादिमां डूबी गयूं तो तरत ते नाश पामेछे. माटे हे भाईयो! एहवां नाशवंत शरीरनाविशे शाश्वत बुद्धी केम रखाय? ने एहवुं शरीर नाश थाय तेमां आश्चर्य ते शूं?

दुर्गंधाशुचिधातुभित्तिकलितं संछादितं चर्मणा
विण्मूत्रादिभृतं क्षुधादिविलसद्दुःखाखुभिश्छिद्रितम् ॥
क्लिष्टं कायकुटीरकं स्वयमपि प्राप्तं जरावह्निना
चेदेतत्तदपि स्थिरं शुचितरं मूढो जनो मन्यते ॥ ३ ॥

टीका-चेत् एतत् कायकुटीरकं दुर्गंधं अशुचिधातुभित्तिकलितं व्याप्तं। पुनः किंलक्षणं कायकुटीरकं चर्मणा संछादितं। पुनः विद्मूत्रादिभृतं। पुनः किंलक्षणं कायकुटीरकं क्षुध् क्षुधा आदि दुःखानि तान्येव मूषकाः तैः क्षुधा दुःखमूषकैः छिद्रितं। पुनः किंलक्षणं कायकुटीरकं स्वयमपि जरावह्निना क्लिष्टं भस्मीभावं प्राप्तं। तदपि मूढः जनः स्थिरं शुचितरं शरीरं मन्यते।

अर्थ—आ कायारूपी झूंपडूं केवूं छे के जेनी भींतो जोइये तो दुर्गंध अपवित्र सप्तधातूनी बनेली, अने तेनाऊपर चामडानो गिलावो, ने वळी अंदर विष्ठा ने मूत्र भरेलां, वळी पाछा तेमां क्षुधा विगैरे दुःखरूपी उंदरडाए छिद्र पाडेलां एटलूंज नहीं पण पोतानीमेळे घडपणरूपी अग्नीथी बळी जाय एहवूं छतां पण मूरख लोको तेने पवित्र अने स्थिर गणेछे!!

अंभोबुद्बुदसन्निभा तनुरियं श्रीरिंद्रजालोपमा
दुर्वाताहतवारिवाहसदृशा कांतार्थपुत्रादयः ॥

सौख्यं वैषयिकं सदैव तरलं मत्तांगनापांगवत्
तस्मादेतदुपप्लवाप्तिविषये शोकेन किं किं मुदा ॥ ४॥

टीका-इयं तनुः अंभोबुद्बुदसन्निभा जलबुद्बुदसदृशा । इयं श्रीः इंद्रजालोपमा अत्र संसारे श्रीः लक्ष्मीः इंद्रजालसदृशा । अत्र संसारे कांतार्थपुत्रादयः दुर्वाताहतमेघपटलसदृशाः । अत्र संसारे सौख्यं विषयभवं सदैव तरलं चंचलं किंवत् मत्तांगनाकटाक्षवत् चंचलं । तस्मात् कारणात् एतस्मिन् पूर्वोक्तसुखे उपप्लवे सति विनाशे सति शोकेन किं । च प्राप्ते सति मुदा किं ।

अर्थ—आ संसारमां शरीर जे छे ते पाणीना बुडबुडा जेवूं छे. अने लक्ष्मी छे ते इंद्रजाळ जेवी छे. अने स्त्री पुत्र धन दौलत तो मोहोटां पवनथी अथडायलां मेघना वादळांजेवां छे. अने विषयथी निपजतूं सुख हमेष चंचल एटले उन्मत्त स्त्रीना नेत्रकटाक्षजेवूं छे. वास्ते एहवा ऊपर बतावेलां सुखनो नाश थयो तो तेमां शोकते शूं? अने मळ्युं तो हरख पण शूं?

दुःखे वा समुपस्थितेऽथ मरणे शोको न कार्यो बुधैः
संबंधो यदि विग्रहेण यदयं संभूतिदात्री तयोः ॥
तस्मात्तत्परिचिंतनीयमनिशं संसारदुःखप्रदो
येनास्य प्रभवः पुरः पुनरपि प्रायो न संभाव्यते ॥ ५॥

टीका-यदि चेत् विग्रहेण शरीरेण सहः संबंधः अस्ति वा तदा दुःखेन समुपस्थिते प्राप्ते सति अथ मरणे प्राप्ते सति बुधैः चतुरैः शोकः न कार्यः न कर्तव्यः यद्यस्मात्कारणात् अयं विग्रहः शरीरः तयोः दुःखशोकयोः द्वयोः संभूतिधात्री जन्मभूमिः तस्मात् कारणात् अनिशं तत् आत्मस्वरूपं परिचिंतनीयं विचारणीयं। येन विचारेण आत्मचिंतनेन पुरः अग्रे पुनरपि अस्य शरीरस्य प्रभवः उत्पत्तिः प्रायः बाहुल्येन न संभाव्यते न संप्राप्यते । किंलक्षणः प्रभवः संसारदुःखप्रदः ।

अर्थ—जो एहवा नाशवंत शरीरनासाथे संबंध छे अने तेमांथी दुःख भोगवूं पडयुं अथवा मरण पण थई गयूं तो तहां डाह्या माणसे शोक करवो नहीं. कारण आ काया जे छे ते दुःख अने शोकने उपजावनारी भूमीज छे. वास्ते निरंतर आत्मस्वरूपनूं चिंतवन करवूं. जे आत्मचिंतवन करवाथी आगळ आ दुःखदायी संसारमां शरीरनूं उपजवूं तथा मरवूं फरीथी थायज नहीं.

दुर्वारार्जितकर्मकारणवशादिष्टे प्रनष्टे नरे
यच्छोकं कुरुते तदत्र नितरामुन्मत्तलीलायितं ॥
यस्मात्तत्र कृतेन सिद्धयति किमप्येतं परं जायते
नश्यंत्येव नरस्य मूढमनसो धर्मार्थकामादयः ॥ ६ ॥

टीका—दुर्वार दुर्निवार अर्जित उपार्जित कर्मकारणवशात् इष्टे नरे प्रनष्टे सति विनाशे सति अत्र संसारे नितरां अतिशयेन यद्यस्मात् नरः शोकं कुरुते तत् उन्मत्तलीलायितं वातूलचेष्टितं अस्ति। यस्मात् कारणात् तत्र तस्मिन् शोके कृते सति किं सिद्धयति न किमपि। परं केवलं एतत् जायते एतत् किं मूढमनसः नरस्य धर्मअर्थकामादयः नश्यंति एव निश्चयेन।

अर्थ—अनिवार उपजावेलां करमनांलीधे आपणो कोई इष्ट पुरुष मरण पामेछे अने तेनामाटे आ संसारमां जे अतिशय शोक करवामां आवेछे ते केवळ भ्रमिष्ट माणसे चेष्टा करवा जेवूंछे. कारण तेहवो शोक करवाथी कशूंए सिद्ध थतुं नथी, पण उलटा तेथी धर्म, अर्थ, काम विगैरे ए मूरख माणस खोई बेसेछे, एटलूं थाय थे.

उदेति पाताय रविर्यथा तथा
शरीरमेतन्ननु सर्वदेहिनां ॥
स्वकालमासाद्य निजे हि संस्थिते
करोति कः शोकमतः प्रबुद्धधीः ॥ ७ ॥

टीका—ननु इति वितर्के यथा रविः पाताय पतनार्थं उदेति उदयं करोति तथा सर्वदेहिनां एतत् शरीरं पाताय पतनार्थं उदेति उदयं करोति । अतः कारणात् स्वकालं आसाद्य प्राप्य निजे स्वकीये मित्रादौ गोत्रजने वा संस्थिते मृते सति कः प्रबुद्धधीः शोकं करोति न कोपि ।

अर्थ—जेम सूर्य जे छे ते अस्त थवाने माटेज उदय पामेछे, तेम संपूर्ण प्राणीमात्रनूं शरीर जे छे ते नाश थवाना माटेज उत्पन्न थायछे. वास्ते पोतानी आयुर्दा पूरी थवाथी जे कोई आपणा भाईबंद सगां वाहलां मरण पामेछे तेना माटे डाह्यू माणस कोई शोक करशे? कोई पण नहीं.

भवंति वृक्षेषु पतंति नूनं
पत्राणि पुष्पाणि फलानि यद्वत् ॥
कुलेषु तद्वत् पुरुषाः किमत्र
हर्षेण शोकेन च सन्मतीनां ॥ ८ ॥

टीका—यद्वत् यथा वृक्षेषु पत्राणि पुष्पाणि फलानि भवंति नूनं पुनः स्वकालं प्राप्य पतंति तद्वत् तथा कुलेषु पुरुषाः संभवंति च पुनः पतंति । अत्र लोके सन्मतीनां भव्यानां हर्षेण किं च पुनः शोकेन किं न किमपि !

अर्थ—जेवीरीते वृक्षने पान, फूल, फळ आवेछे अने तेनो खारवानो वखत आव्यो एटले नीचे खीरी पडेछे; तेवीरीते कुळमां मनुष्य जनम लेछे अने वखत आवे मरी जायछे, माटे समजू माणसे तेथी हरख ते शूं करवो अने शोक पण शूं करवो? कईज नहीं.

दुर्लंघ्याद्भवितव्यता व्यतिकरान्नष्टे प्रिये मानुषे
यच्छोकः क्रियते तदत्र तमसि प्रारभ्यते नर्तनं ॥
सर्वं नश्वरमेव वस्तु भुवने मत्वा महत्या धिया
निर्धूताखिलदुःखसंततिरहो धर्मः सदा सेव्यतां ॥ ९ ॥

टीका—अत्र संसारे दुर्लंघ्यात् दुर्निवारात् भवितव्यतास्वरूपात् प्रिये मानुषे नष्टे सति यत् शोकः क्रियते तत् तमसि अंधकारे नर्तनं प्रारभ्यते । अहो इति संबोधने भो भव्याः भुवने संसारे सर्वं वस्तु नश्वरं विनश्वरं मत्वा ज्ञात्वा महत्या धिया गरिष्ठबुद्ध्या सदा धर्मः सेव्यतां । किंलक्षणो धर्मः निर्द्धूता स्फोटिता अखिल-दुःखसंततिः येन सः ।

अर्थ—आ संसारमां टाळी नहि शकाय एहवां भावी बनाव बनवाथी आपणूं वाहालूं माणस मरण पाम्याथी जे शोक करिये छीये ते अंधारामां नृत्य करवा जेवूं छे. वास्ते हे भाईयो, आ संसारमां सर्व वस्तूओ नाशवंत छे एम समझीने विवेकी माणसे सदा धर्मनूं सेवन करवूं जोइये. कारण धर्मथी संपूर्ण दुःख मटी जायछे.

पूर्वोपार्जितकर्मणा विलिखितं यस्यावसानं यदा
तज्जायेत तदैव तस्य भविनो ज्ञात्वा तदेतद्ध्रुवं ॥
शोकं मुंच मृते प्रियेपि सुखदं धर्मं कुरुष्वादरात्
सर्पे दूरमपागते किमिति भोस्तद्धृष्टिराहन्यते ॥ १० ॥

टीका—यस्य भविनः जीवस्य पूर्वोपार्जितकर्मणा यदा यस्मिन् समये अवसानं अंतः नाशः विलिखितः तस्य भविनः जीवस्य तत् अवसानं विनाशः तदा तस्मिन् समये जायेत उत्पद्येत तदेतत् ध्रुवं निश्चितं ज्ञात्वा प्रियेपि मृते शोकं मुंच त्यज । आदरात् सुखं धर्मं कुरुष्व । भोभव्याः सर्पे दूरं अपागते सति तस्य सर्पस्य घृष्टिः लीला आहन्यते यष्टिभिः पीड्यते । इति मूर्खत्वं ।

अर्थ—जे प्राणीनो पूर्वे उपजावेला कर्मप्रमाणे जे वखते अंत थवानो लखेलो ते वखते ते जीवनो अंत थायछे एहवो निश्चय छे, एम समझीने वाहलाना मरणनो शोक मूकीद्यो. अने प्रेमभावथी धर्म करो. हे भव्य जीवो, सर्प निकळीने छेटे गयाकेडे तेना लिसोटाने लाकडीथी ठोकवूं ते मूर्खाईछे.

ये मूर्खा भुवि तेपि दुःखहतये व्यापारमातन्वते
सा माभूदथवा स्वकर्मवशतस्तस्मान्न ते तादृशाः ।
मूर्खान्मूर्खशिरोमणीन्ननु वयं तानेव मन्यामहे
ये कुर्वंति शुचं मृते सति निजे पापाय दुःखाय च ११

टीका—भुवि भूमंडले अपि ये मूर्खाः शठाः दुःखहतये दुःखविनाशाय व्यापारं आतन्वते विस्तारयंति । तस्मात् कर्मवशतः सा दुःखहतिः माभूत् अथवा ते मूर्खाः तादृशाः ननु इति वितर्के वयं तान् एव मूर्खान् मूर्खशिरोमणीन् मन्यामहे । ये शुचं शोकं कुर्वंति क्व सति निजे इष्टे मृते सति । तत् शोकं पापाय च पुनः दुःखाय भवति ।

अर्थ—आ जगतमां जे मूरख लोक दुःख मटवामाटे रोवा कूटवानो धंधो वधारेछे तेनाथी कर्मना लीधे तेमनूं दुःख तो घटतूं नथीज, पण ते शोकथी उलटूं पाप अने दुःख थायछे. वास्ते जे लोक पोताना सगां वाहलाना मरणना लीधे शोक करतां बेसेछे तेमने अमे मूरखना शिरोमणी मानिये छीये.

किं जानासि न किं शृणोषि ननु किं प्रत्यक्षमेवेक्षसे
निश्शेषं जगदिंद्रजालसदृशं रंभेव सारोज्झितं ॥
किं शोकं कुरुषेत्र मानुषपशो लोकांतरस्थे निजे
तत्किंचित्कुरु येन नित्यपरमानंदास्पदं गच्छसि ॥१२॥

टीका—भो मानुषपशो निःशेषं जगत् इंद्रजालसदृशं रंभाइव कदलीगर्भवत् सारोज्झितं किं न जानासि किं न शृणोषि प्रत्यक्षं किं न ईक्षसे । अत्र संसारे निजे इष्टे लोकांतरस्थे मृते सति शोकं किं कुरुषे तत् किंचित् स्वकार्यं कुरु येन कार्येण नित्यपरमानंद आस्पदं स्थानं गच्छसि ।

अर्थ—हे मनुष्यरूप पशू तूं आ जगत इंद्रजाळ जेवूं अने केळना गाभानी पेठे असार जाणतो नथी के शूं? अने तेम सांभळ्यूं नथी के शूं? वळी प्रत्यक्ष तारा नजरे तूं जोतो नथी के शूं? अरे, आ संसारमां पोतानूं प्यारूं कोई परलोक जाय तेनामाटे तूं शोक शुं करेछे? एहवूं कांइ आत्मकल्याणनूं काम कर के जेनाथी तूं सदाकाळ परमानंद पद्ने प्राप्त थईश.

जातो जनो म्रियत एव दिने च मृत्योः
प्राप्ते पुनस्त्रिभुवनेपि न रक्षकोस्ति ।
तद्यो मृते सति निजेपि शुचं करोति
पूत्कृत्य रोदति वने विजने स मूढः ॥ १३ ॥

टीका—जातः उत्पन्नो नरः च पुनः मृत्योः दिने प्राप्ते सति म्रियते एव निश्चयेन । पुनः त्रिभुवने कोपि रक्षको न अस्ति तत्तस्मात् कारणात् यः जनः निजेपि इष्टे मृते सति शुचं करोति शोकं करोति सः मूढः विजने जनरहिते वने पूत्कृत्य रोदति ।

अर्थ—जे माणस जनम पाम्यो छे ते मरणनो वखत आवे मरवानो छेज एमां भूल नथी. तेने रक्षण करवा आ त्रैलोक्यमां कोईपण समर्थ नथी. वास्ते जे माणस पोतानूं कोई मरी जवाथी शोक करतो बेसेछे तेनो शोक जेम मूरख माणसे वगडामां, जहां कोई सांभळवा पण नथी तहां, मोहोटां पोकार करीने रोवा जेवोछे.

इष्टक्षयो यदिह ते यदनिष्टयोगः
पापेन तद्भवति जीव पुराकृतेन ।
शोकं करोषि किमु तस्य कुरु प्रणाशं
पापस्य तौ न भवतः पुरतोपि येन ॥ १४ ॥

टीका—भो जीव इह संसारे यत् अनिष्टयोगः यत् इष्टक्षयः अनिष्ट संगः इष्टविनाशः तत्पापेन भवति पुराकृतेन पापेन भवति ।

भो जीव शोकं किमु करोषि तस्य पापस्य प्रणाशं कुरु । येन पाप-प्रणाशेन पुरतो अग्रतः तौ द्वौ अनिष्टसंयोगइष्टवियोगौ न भवतः ।

अर्थ—अरे जीव, आ संसारमां जे अणगमतूं आवी मळेछे, अने भावतूं निकळी जायछे ते बधूं पेहेलां करेलां पापना लीधे थायछे. वास्ते तूं शोक शूं करेछे? ते पापनो क्षय करवा मांड! कारण पापनो क्षय थशे पदले पछे अणगमतूं आवी पडवूं अने भावतूं निकळी जवूं ए बन्ने थवाना मटी जशे.

नष्टे वस्तुनि शोभनेपि हि तदा शोकः समारभ्यते
तल्लाभोथ यशोथ सौख्यमथवा धर्मोथवा स्याद्यदि ।
यद्येकोपि न जायते कथमपि स्फारैः प्रयत्नैरपि
प्रायस्तत्र सुधीर्मुधा भवति कः शोकोग्ररक्षोवशः ॥१५

टीका—हि यतः शोभने अपि वस्तुनि नष्टे सति तदा शोकः समारभ्यते । यदि चेत् तल्लाभः तस्य वस्तुनः लाभः भवेत् अथ यशः भवेत् अथवा सौख्यं भवेत् अथवा धर्मः भवेत् । यदि तत्र चतुर्णां मध्ये एकः अपि कथमपि स्फारैः विस्तीर्णैः प्रयत्नैः कृत्वा प्रायः बाहुल्येन न जायते एकः अपि न उत्पद्यते। तदा कः सुधीः ज्ञानवान् मुधा शोकराक्षसवशः भवति । अपि तु न भवति ।

अर्थ—आपणी घणी गमती वस्तु जती रहे त्यारे शोक करिये छिये; पण ते शोक करवाथी ते वस्तु पाछी जडे तेम होय, अथवा ते शोक करवाथी कंई जस मळतूं होय, अथवा सुख थतूं होय, अथवा धर्म थतो होय, तो ते करवो ठीकज छे. पण आ चारमांथी एक पण शोक करवाथी थतूं नथी तो पछे कोण समजू माणस शोक करतो बेसशे? कोई नहीं.

एकद्रुमे निशि वसंति यथा शकुंताः
प्रातः प्रयांति सहसा सकलासु दिक्षु ।

स्थित्वा कुले बत तथान्यकुलानि मृत्वा
लोकाः श्रयंति विदुषा खलु शोच्यते कः ॥ १६ ॥

टीका–यथा शकुंताः पक्षिणः निशि रात्रौ एकद्रुमे वसंति प्रातः सुप्रभाते सहसा सकलासु दिक्षु प्रयांति गच्छंति । बत इति खेदे तथा लोकाः अन्यकुले स्थित्वा अन्यकुलानि मृत्वा आश्रयंति । खलु निश्चितं विदुषा पंडितेन कस्य कृते कारणाय शोच्यते । अपि तु न शोच्यते ।

अर्थ—जेम रात्रीनाविषे पंखियो एक झाडऊपर बेसेछे, अने सवारना सर्वे दिशामां ऊडी जायछे; तेम माणसपण एक कुळमां आवेछे अने तहांथी मरीने बीजा कुळमां जायछे. माटे विचारवान माणस शावास्ते शोक करे ?

दुःखव्यालसमाकुलं भववनं जाड्यांधकाराश्रितं
तस्मिन् दुर्गतिपल्लिपातिकुपथैः भ्राम्यंति सर्वेंगिनः ।
तन्मध्ये गुरुवाग्प्रदीपममलज्ञानप्रभाभासुरं
प्राप्यालोक्य च सत्पथं सुखपदं याति प्रबुद्धो ध्रुवं १७

टीका–भववनं संसारवनं दुःखव्याला हस्तिनः तैः समाकुलं भरितं । पुनः किंलक्षणं भववनं जाड्यांधकार मूर्खतांधकार आश्रितं । तस्मिन् भववने संसारवने दुर्गति पल्लिपातिकुपथैः दुर्गति भिल्लसति कागमनशीलकुमार्गैः सर्वे अंगिनः जीवाः भ्राम्यंति । तन्मध्ये संसारवनमध्ये गुरुवाक् गुरुवचनप्रदीपं प्राप्य च पुनः आलोक्य सत्पथं दृष्ट्वा प्रबुद्धः ज्ञानवान् सुखपदं मोक्षपदं याति गच्छति । किंलक्षणं गुरुवचनं अमल निर्मल ज्ञानप्रभाभासुरं प्रकाशमानं ।

अर्थ—आ संसाररूपी वन केवूं छे के जेमां दुःखरूपी हाथी भरेलां छे, मूर्खाईरूपी अंधकार फेलायलो छे, वळी जहां दुर्गतीरूपी

भील लूटी जाय एहवा खराब रस्तां छे. एहवां संसाररूपी वनमां संपूर्ण प्राणीमात्र भ्रमण करेछे. तहां ज्ञानी माणसने गुरूनो उपदेश-रूपी दीवो जडे तो तेना आधारथी ते पोताना धान्या ठेकाणे एटले मोक्षस्थानमां पोहोंची शकेछे. कारण गुरुवचन ते ठेकाणे बहु प्रकाश बतावनारूं छे.

यैवस्वकर्मकृतकालकलात्रजंतु-
स्तत्रैव याति मरणं न पुरो न पश्चात् ।
मूढास्तथापि हि मृते स्वजने विधाय
शोकं परं प्रचुर दुःखभुजो भवंति ॥ १८ ॥

टीका—अत्र संसारे स्वकर्मकृतकालकला मरणवेला अस्ति तत्रैव वेलायां जंतु मरणं याति गच्छति न पुरः अग्रे न पश्चात् । हियतः मूढाः जनाः तथापि स्वजने इष्टे मृते सति परं शोकं केवलं विधाय कृत्वा प्रचुरदुःखभोक्तारः भवंति ।

अर्थ—आ संसारमां हरएक प्राणी पोतानां बांधेलां कर्मप्रमाणे जे वखत मरवानो तेज वखते मरण पामवानो छे. तेमां घडी आगळ पाछळ थवानी नथी. तेम छतां सगावाहलानां मरण थवाथी मूर्ख लोको मोहोटा शोक आदरीने अतिशय दुःखना भोग थई पडेछे.

वृक्षाद्वृक्षमिवांडजा मधुलिहः पुष्पाच्च पुष्पं यथा
जीवा यांति भवाद्भवांतरमिहाश्रांतं तथा संसृतौ ।
तज्जातेथ मृतेथ वा नहि मुदं शोकं न कस्मिन्नपि
प्रायः प्रारभतेधिगम्य मतिमानस्थैर्यमित्यंगिनां ॥१९॥

टीका—इह संसारे जीवाः आश्रांतं निरंतरं भवात् भवांतरं यांति पर्यायात् पर्यायांतरं गच्छंति । तत्र दृष्टांतमाह । यथा अंडजाः पक्षिणः वृक्षात् वृक्षं यांति । यथा मधुलिहो भृंगाः पुष्पात् अन्यं पुष्पा यांति तथा जीवाः इत्यर्थः । तत्तस्मात् कारणात् मति-

वान् ज्ञानवान् भव्यः इति अमुना प्रकारेण अंगिनां जीवानां अस्थैर्यं विनश्वरत्वं अधिगम्य ज्ञात्वा इष्टे जातेसति उत्पन्नेसति मुदं न प्रारभते हर्षं न कुरुते । अथवा कस्मिन् इष्टे मृतेसति शोकं न प्रारभते प्रायः बाहुल्येन शोकं न कुरुते ।

अर्थ—आ संसारमां पंखियो जेम एक झाड ऊपरथी ऊडीने बीजा झाडऊपर बेसेछे, भ्रमरा एक फूलऊपरथी ऊडीने बीजां फूलऊपर बेसेछे, तेम प्राणीमात्रपण एक भव छोडीने बीजो भव हमेष लीधां करेछे. वास्ते समजू माणस आ जीवतर बधूं क्षणभंगुर छे एम समजीने कोई वाहालूं जनम पाम्यूं तो हरख करतो नथी, तेम कोई वाहालूं सगूं मरण पाम्यूं तो शोकपण करतो नथी.

भ्राम्यत् कालमनंतमत्र जनने प्राप्नोति जीवो न वा
मानुष्यं यदि दुष्कुले तदघतः प्राप्तं पुनर्नश्यति ।
सज्जातावथ तत्र याति विलयं गर्भेपि जन्मन्यपि
द्राग् बाल्येपि ततोपि नो वृष इति प्राप्ते प्रयत्नो वरः २०

टीका—अत्र जनने संसारे अनंतं कालं भ्राम्यत् जीवः मानुष्यं मनुष्यपदं प्राप्नोति वा न प्राप्नोति । यदिचेत् दुष्कुले निंद्यकुले तत् नरत्वं प्राप्तं अघतः पापतः पुनः तन्नरत्वं नश्यति । अथ सज्जातौ समीचीनकुले प्राप्ते अपि तत्र सत्कुले विलयं विनाशं याति । गर्भे अपि जन्मनि अपि द्राक् बाल्ये अपि विलयं याति । ततः कारणात् वृषे धर्मे प्राप्ते सति इति वरः श्रेष्ठः प्रयत्नः किं नो क्रियते । अपि तु धर्मे यत्नः क्रियते ।

अर्थ—आ संसारमां आ जीवने अनंतकाळसुधी भमता भमता मनुष्य जनम मळवोज कठण. कदापी ते मळ्यो पण जो नीचां कुळमां जनम थाय तो ते जनम तहां पाप करमथी नकामो जाय. जो सारां कुळमां कोई वखत जनम थाय तो केटलीक वखत गरभमांज मरी जायछे अने केटलीक वखत जनम थयांकेडे बाळ अवस्तामां मरी जायछे.

वास्ते धरम सेवन करवानां साधनो मळ्यां होय तो धर्म सेवन करवामां बनतो उद्यम शा माटे न करवो ?

स्थिरं सदपि सर्वदा भृशमुदेत्यवस्थांतरैः
प्रतिक्षणमिदं जगज्जलदकूटवन्नश्यति ।
तदत्र भवमाश्रिते मृतिमुपागते वा जने
प्रियेपि किमहो मुदा किमु शुचा प्रबुद्धात्मनः ॥२१॥

टीका—इदं जगत् सर्वदाकाले स्थिरं शाश्वतं सत् सत्तारूपं ध्रौव्यं अपि प्रतिक्षणं समयं समयंप्रति अवस्थांतरैः पर्यायांतरैः भृशं अत्यर्थं उदेति पुनः नश्यति । किंवत् जलदकूटवत् मेघपटलवत् । तत्तस्मात् कारणात् अत्र संसारे प्रिये इष्टे जने भव आश्रिते जन्मप्राप्तेसति प्रबुद्धात्मनः मुदा हर्षेण किं । न किमपि । वा प्रिये इष्टे जने मृतिं मरणं उपागते सति अहो इति संबोधने प्रबुद्धात्मनः ज्ञानयुक्तपुरुषस्य शुचा किमु शोकेन किं । न किमपि ।

अर्थ—आ जगत सदा सर्वकाळ सत्तारूपे शाश्वत छे तोपण मेघनां वादळां जेवूं क्षणक्षणमां पर्याय बदलीने हमेश उत्पत्ति अने नाश पाम्यां करेछे. वास्ते करीने आ संसारमां कोई वाहालानां जनम थयां तो तेथी चतुर पुरुषे हरखते शूं करवो ? अने कोई वाहालां सगांनो मृत्यू थाय तो तेनो शोक पण शूं करवो ? कईज नहीं.

लंघ्यंते जलराशयः शिखरिणो देशास्तटिन्या जनैः
सा वेला तु मृतेर्नृपक्ष्मचलनस्तोकापि देवैरपि ॥
तत्कास्मिन्नपि संस्थिते सुखकरं श्रेयो विहाय ध्रुवं
कः सर्वत्र दुरंतदुःखजनकं शोकं विदध्यात्सुधीः ॥२२॥

टीका—जनैः लोकैः जलराशयः समुद्राः लंघ्यंते । शिखरिणः पर्वताः लंघ्यंते । देशाः लंघ्यंते । जनैः तटिन्यः नद्यः लंघ्यंते । पुनः मृतेः मरणस्य सा वेला देवैरपि नृपक्ष्मचलनस्तोका अपि मनु-

ष्यनेत्रपलकसदृशा अपि न लंघ्यंते। तत्तस्मात्कारणात् कस्मिन् इष्टे संस्थितेसति मृतेसति सुखकरं श्रेयः पुण्यं विहाय त्यक्त्वा कः सुधीः ज्ञानवान् शोकं विदध्यात् शोकं कुर्यात्। किंलक्षणं शोकं सर्वत्र सदैव दुरंतदुःखजनकं उत्पादकं।

अर्थ—लोको समुद्र उल्लंघन करी शकेछे, मोटा मोटा ऊंचा पर्वत ओळंगी शकेछे, लांबा लांबा देश ओळंगेछे, मोहटी मोहटी नदियो ओळंगी शकेछे, पण मरणनी जे वखत ठरेली छे ते आंखनी एक पलकमात्रबी मोहटा देवताओथी पण ओळंगी शकाती नथी. वास्ते करीने आपणूं कोई वाहालुं सगूं मरी जाय ते वखत पुण्यना काम करवाना मूकी देईने डाह्यो माणस कोई रोतो बेसशे? कोई नहीं. कारण रोवाथी हमेश दुःखज उपजवानूं छे.

आक्रंदं कुरुते यदत्र जनता नष्टे निजे मानुषे
जाते यच्च मुदं तदुन्नतधियो जल्पंति वातूलतां ॥
यज्जाड्यात्कृतदुष्टचेष्टितभवत्कर्मप्रबंधोदया-
न्मृत्यूत्पत्तिपरंपरामयमिदं सर्वं जगत्सर्वदा ॥ २३ ॥

टीका—अत्र संसारे जनता जनसमूहः निजे मानुषे नष्टेसति मृतेसति यत् आक्रंदं रोदनं कुरुते। च पुनः निजे इष्टे जातेसति उत्पन्नेसति यत् मुदं हर्षं कुरुते तत् उन्नतधियः गणधरदेवाः वातूलतां जल्पंति कथयंति। यतः यत् इदं सर्वं जगत् सर्वदा सदैव जाड्यात् कृतदुष्टचेष्टितभवत्कर्मप्रबंधोदयात् उपार्जितकर्मविपाकात् मृत्यूत्पत्तिपरंपरामयं सर्वं जगत् इत्यर्थः।

अर्थ—आ संसारमां जे लोको पोतानूं इष्ट माणस मरी जवाथी रुवे कुटेछे, अने कोई इष्ट प्राणीनो जनम थवाथी हरख मानेछे ते बधूं अभिष्ट माणसना बकवा जेवूं छे. कारण के आ आखूं जगत पोताना कर्‍यां कर्म उदय आवे ते प्रमाणे सदा सर्वकाळ जनम मरणना फेरामांज छे.

गुर्वी भ्रांतिरियं जडत्वमथवा लोकस्य यस्माद्वसन्
संसारे बहुदुःखजालजटिले शोकी भवत्यापदि ॥
भूतप्रेतपिशाचफेरवचितापूर्णे श्मशाने गृहं
कः कृत्वा भयदादमंगलकृताद्भावाद्भवेच्छंकितः ॥२४॥

टीका—लोकस्य इयं गुर्वी भ्रांतिः गुरुतरभ्रमः अथवा जडत्वं। यस्मात्संसारे वसन् तिष्ठन् सन् आपदिसत्यां शोकी भवति शोकं करोति। किंलक्षणे संसारे बहुदुःखजालजटिले बहुलदुःखपूर्णे। श्मशाने गृहं कृत्वा भयदात् भावात् पदार्थात् कः पुमान् शंकितः भवेत्। किंलक्षणे श्मशाने भूतप्रेतपिशाचफेरवफेत्कारशब्दचितापूर्णे। पुनः किंलक्षणे श्मशाने अमंगलकृते अमंगलस्वरूपे।

अर्थ—लोकने आ कंई भ्रम छे के लोकनी मूर्खता छे? कारण अनेक जातनां दुःखथी भरेला एहवा संसारमां रहेछे अने दुःख आवे त्यारे पाछो रोतो बेसेछे. जुवो, जहां स्मशानमां मडदां बळतां होय, भूतपिशाचना भयंकर शब्द थतां होय, जहां बधूं अमंगळ देखीतूं होय, त्यां घर बांधीने बेसवूं अने त्यां भूतनी बीक हशे के शूं एहवी शंका करवी ते केवूं केहवाय?

भ्रमति नभसि चंद्रः संसृतौ शश्वदंगी
लभत उदयमस्तं पूर्णतां हीनतां च ॥
कलुषितहृदयः सन् याति राशिं च राशे-
स्तनुमिह तनुतस्तत्कोत्र मुत्कश्च शोकः ॥ २५ ॥

टीका—यथा चंद्रः शश्वत् नभसि आकाशे भ्रमति तथा संसृतौ संसारे अंगी जीवः भ्रमति। च पुनः यथा चंद्रः उदयं अस्तं पूर्णतां हीनतां लभते तथा प्राणी उदयं अस्तं पूर्णतां हीनतां लभते। च पुनः यथा चंद्रः कलुषितहृदयः सन् सकाशात् राशेः राशिं याति

इह संसारे तथा प्राणी तनुतः शरीरात् शरीरं याति । तत्तस्मात् अत्र संसारे मुत् हर्षः कः च पुनः शोकः कः। नच शोकः नच हर्षः।

अर्थ—जेम चंद्रमा आकाशमां सदाकाळ भ्रमण करेछे, तेम आ संसारमां प्राणी पण भ्रमण करेछे. जेम चंद्रमानो उदय अस्त थायछे तेम प्राणीमात्रभी उपजेछे अने मरेछे. जेम चंद्रमा नाहनो मोटो थायछे तेम प्राणीयोनी स्थितीपण चढती पडती थयां करेछे. जेम चंद्रमा मेला अंतःकरणनो छतां एक राशीथी बीजा राशीए जायछे तेम प्राणी पण एक शरीर मूकीने बीजुं शरीर धारण करेछे. वास्ते एहवा संसारमां हरख ते शो अने शोक ते शो? हरखने शोक कंईभी नही.

तडिदिव चलमेतत्पुत्रदारादि सर्वं
किमिति तदभिघाते खिद्यते बुद्धिमद्भिः ॥
स्थितिजननविनाशं नोष्णतेवानलस्य
व्यभिचरति कदाचित् सर्वभावेषु नूनम् ॥ २६ ॥

टीका—भो भव्याः एतत्पुत्रदारादि सर्वं तडिदिव चलं विद्युदिव चपलं इति ज्ञात्वा तदभिघाते तस्य पुत्रदारादिकस्य अभिघाते सति मृतौ सत्यां बुद्धिमद्भिः किं खिद्यते । नूनं निश्चितं सर्वभावेषु पदार्थेषु षट्द्रव्येषु स्थितिजननविनाशं अनलस्य अग्नेः उष्णतेव कदाचित् नो व्यभिचरति। अग्निः उष्णतां न दूरीकरोति।

अर्थ—हे भव्य जीवो, आ स्त्रीपुत्रादिक बधां वीजळीना चमकारा जेवां क्षणभंगुर छे, एम जाणीने तेमनां मरण थवाथी समजू माणसे खेद शामाटे करवो जोइये? दुनियामां जेटलां पदार्थ छ द्रव्यमां छे ते बधाने उपजवूं, नाश थवूं अने स्थीर रेहवूं साथेज छे. जेम अग्निना साथे उष्णता होयने होयज.

प्रियजनमृतिशोकः सेव्यमानोतिमात्रं
जनयति तदसातं कर्म यच्चाग्रतोपि ॥

प्रसरति शतशाखं देहिनि क्षेत्रउप्तं
वट इव तनुबीजं त्यज्यतां सप्रयत्नात् ॥ २७ ॥

टीका–प्रियजनमृतिशोकः अतिमात्रं अतिशयेन सेव्यमानः तत् असातं कर्म जनयति पापकर्म उत्पादयति । च पुनः यत्कर्म अग्रतः अग्रे देहिनि जीवे शतशाखं प्रसरति । यथा वटबीजं तनुरपि लघुरपि बीजं क्षेत्रे उप्तं वपितं शतशाखं प्रसरति इति मत्वा सः शोकः प्रयत्नात् त्यज्यताम् ।

अर्थ–कोई आपणूं वाहालूं सगूं मरवाथी अतिशय शोक करवो तेथी असाताकर्मनो बंध पडेछे. अने ते कर्म आगळ जतां शेंकडोगणूं फेलायछे. जेम वडनूं बीज झीणूं छे तो पण जमीनमां वाविये तो तेनो मोटो वृक्ष थायछे तेम असाताकर्म वधेछे. एम समजीने शोक मटाडवानो प्रयत्न करवो जोइये.

आयुःक्षतिः प्रतिक्षणमेतन्मुखमंतकस्य तत्रगताः ॥
सर्वे जनाः किमेकः शोचयत्यन्यं मृतं मूढः ॥ २८ ॥

टीका–आयुःक्षतिः आयुर्विनाशः प्रतिक्षणं समयं समयं प्रति आयुर्विनाशः एतत् अंतकस्य यमस्य मुखं तत्र यममुखे सर्वे जनाः गताः एकः मूढः अन्यं मृतं किं शोचयति ।

अर्थ–आवखानो क्षय तो समयसमयप्रति थयां करेछे. अने आवखानो नाश तो काळनूं मोढूंज छे एम समजवूं. अने ते काळना मोढामां बधायने जवानूं छेज. तेम छतां एक जणो बीजाना मरणमाटे रोतो बेसेछे ते मूरखके नही?

योनात्र गोचरं मृत्योर्गतो याति न यास्यति ॥
स हि शोकं मृते कुर्वन् शोभते नेतरः पुमान् ॥ २९ ॥

टीका–अत्र संसारे यः नरः मृत्योः यमस्य गोचरं न गतः यः पुमान् मृत्योः गोचरं न याति यः पुमान् मृत्योः गोचरं न या-

स्यति । हि यतः सः पुमान् मृते सति शोकं कुर्वन् सन् शोभते । इतरः यमाधीनः पुमान् शोकं कुर्वन् न शोभते ।

अर्थ—आ संसारमां जे माणस मरण पाम्यो नथी, अथवा मरण पामतो नथी. अथवा मरण पामवानो नथी, तेवो माणस शोक करे तो शोभे. पण जे पुरुष काळना स्वाधीन छे ते शोक करे तो ते शोभतो नथी.

प्रथममुदयमुच्चैर्दूरमारोहल्लक्ष्मी-
मनुभवति च पातं सोपि देवो दिनेशः ॥
यदि किल दिनमध्ये तत्र तेषां नराणां
वसति हृदि विषादः सत्स्ववस्थांतरेषु ॥ ३० ॥

टीका—अत्र संसारे सोऽपि देवः दिनेशः सूर्यः यदि चेत् किल इति सत्ये दिनमध्ये एकदिनमध्ये प्रथमं उच्चैः अतिशयेन उदयं आरोहति लक्ष्मीं अनुभवति प्राप्नोति । च पुनः पातं पतनं अनुभवति । तत्र संसारे अवस्थांतरेषु सत्सु मृतेषु सत्सु केषां नराणां हृदि विषादः वसति अपि तु न वसति ।

अर्थ—आ संसारमां दिनपती जे सूर्यसरखा देव तेपण एक दाडामां ऊंचा ठेकाणे चढीने पोतानूं पूर्ण तेज प्रकाशेछे, अने पाछो नीचो आवी जायछे. ज्यारे एहवा संसारमा केटलीए अवस्थाओ बदलाई जायछे त्यारे मृत्यु थवो एपण एक अवस्था बदलाई केहेवाय माटे तेनावास्ते कोण खेद करशे !

आकाश एव शशिसूर्यमरुत्खगाद्याः
भूपृष्ठ एव शकटप्रमुखाश्चरंति ॥
मीनादयश्च जलएव यमस्तु याति
सर्वत्र कुत्र भविनां भवति प्रयत्नः ॥ ३१ ॥

टीका–शशिसूर्यमरुत्खगाद्याः एव निश्चयेन आकाशे चरंति गच्छंति । शकटप्रमुखाः भूपृष्ठे चरंति गच्छंति । च पुनः मीनादयः मत्स्यादयः जले चरंति । तु पुनः यमः सर्वत्र याति। भविनां जीवानां प्रयत्नः कुत्र भवति, मुक्तिविना न कुत्रापि ।

अर्थ—चंद्र, सूर्य, वायु, ग्रह इत्यादि नभचर जीव आकाशमां विचरेछे. घोडा, गाडियो, बळद विगेरे थलचर प्राणी जमीनऊपर चालेछे. माछलां आदि जलचर जीव पाणीमां रहेछे. पण यमराज एटले काळ जे छे ते बद्धां ठेकाणे पोंहचेछे. वास्ते प्राणियोंने मरणथी बचवानो रस्तो मुक्तिविना बीजो क्यां छे! कोई ठेकाणे नथी.

किं देवः किमु देवता किमगदो विद्यास्ति किं किं मणिः
किं मंत्रः किमुताश्रयः किमु सुहृत्किंवा सगंधोस्ति सः ॥
अन्ये वा किमु भूपतिप्रभृतयः संत्यत्र लोकत्रये
यैः सर्वैरपि देहिनः स्वसमये कर्मोदितं वार्यते ॥३२॥

टीका–देवः किं अस्ति । देवता किमु अस्ति । अगदः वैद्यः औषधं वा किं अस्ति । सा विद्या किं अस्ति । सः मणिः किं अस्ति । किं मंत्रः उत अहो सः आश्रयः किं अस्ति । सः सुहृत् किं अस्ति । वा सः गंधः किं अस्ति । वा अन्ये भूपतिप्रभृतयः संति । अत्र लोके यैः सर्वैः अपि देहिनः जीवस्य स्वसमये कर्मोदितं वार्यते निवार्यते ।

अर्थ—आलोकमां जीवने कर्मना उदय प्रमाणे आवेलूं मरण रोकवाने कोई देव अथवा देवता समर्थ छे? कोई वैद्य अथवा औषध, मंत्र, मणी, कंई करी शकेछे? कोई मित्र राजा गंध इत्यादिनो कंई इलाज चालेछे? आयुर्दा पूरी थये कोईनो इलाज नथी.

गीर्वाणा अणिमादिसुस्थमनसः शक्ताः किमत्रोच्यते
ध्वस्तास्तेपि परंपरेण सपरस्तेभ्यः कियान् राक्षसः ।

रामाख्येन च मानुषेण निहितः प्रोल्लंघ्य सोप्यंबुधिं
रामोप्यंतकगोचरः समभवत्कोऽन्यो बलीयान् विधेः ॥

टीका—भो भव्याः गीर्वाणाः देवाः शक्ताः समर्थाः संति। अत्र लोके तेषां देवानां किं बलं उच्यते किं कथ्यते। किंलक्षणाः देवाः अणिमादिसुस्थमनसः अणिमादिऋद्धियुक्ताः ते अपि देवाः परं केवलं परेण शत्रुणा रावणेन ध्वस्ताः पीडिताः तेभ्यः देवेभ्यः सः रावणः राक्षसः कियान् कियन्मात्रं सः परः रावणः। च पुनः अंबुधिं समुद्रं प्रोल्लंघ्य रामाख्येण मानुषेण निहितः मारितः रामः अपि अंतकगोचरः यमगोचरः समभवत् संजातः विधेः कर्मणः सकाशात् अन्यः कः बलीयान् बलिष्ठः न कोऽपि।

अर्थ—आ लोकमां अणिमादि ऋद्धीना धारक देवता जे छे तेमनूं बळ सऊथी मोटूं केहेवायछे. तोपण ते देवताओनो एक रावणसरखा राक्षसे नाश कर्यो. देवताओने पीडा करनारो एहवो मोटो रावण तेने पण रामचंद्रसरखा माणसे समुद्र ओळंगीने मारी नाख्यो, अने एहवां रामचंद्रसरखा पराक्रमी वीर पुरुष पण काळथी छुट्या नथी. तो बीजो कोण एहवो बळवान छे जे काळथी बचे? कोई पण नथी.

सर्वत्रोद्गतशोकदावदहनव्याप्तं जगत्काननं
मुग्धास्तत्र वधूमृगी गतधियस्तिष्ठंति लोकैणकाः।
कालव्याध इमान्निहंति पुरतः प्राप्तान् सदा निर्दय-
स्तस्माज्जीवति नो शिशुर्नच युवा वृद्धोऽपि नो कश्चन॥

टीका—जगत्काननं संसारवनं सर्वत्र उद्गतशोक उत्पन्नशोकदावदहनेन व्याप्तं। तत्र संसारवने मुग्धाः मूर्खाः लोकैणकाः लोकमृगाः तिष्ठंति। किंलक्षणाः लोकमृगाः वधूमृगीगतधियः स्त्रीमृगीविषये प्राप्तबुद्धयः कालव्याधः यमव्याधः यदा इमान् निहंति मार-

यति । किंलक्षणान् लोकमृगान् पुरतः अग्रे प्राप्तान् । किंलक्षणः कालव्याधः सदानिर्दयः दयारहितः तस्मात् कालव्याधात् शिशुः बालः नो जीवति । च पुनः युवा न जीवति कश्चन वृद्धोऽपि न जीवति ।

अर्थ—आ संसाररूपी वन जे छे ते उपजेला शोकरूपी दावानलथी व्यापी गएलूं छे एहवां संसार वनमां मूर्ख लोकरूपी मृग रहे छे. अने ते स्त्रीरूपी हरिणीना विषयमां लपटाई गएलां छे. एहवां लोकरूपी मृग काळरूपी पारधीना सामां आवी उभां थएलां छे. तेमने आ निर्दय काळरूपी पारधी मारी नाखेछे. वास्ते आ काळरूपी पारधीना सपाटामांथी बाळक हो, जुवान हो, अथवा वृद्ध हो, कोई पण बची शकतो नथी.

संपच्चारुलतः प्रियापरिलसद्वल्लीभिरालिंगितः
पुत्रादिप्रियपल्लवो रतिसुखप्रायैः फलैराश्रितः ॥
जातःसंसृतिकानने जनतरुः कालोग्रदावानल-
व्याप्तश्चेन्न भवेत्तदा बत बुधैरन्यत्किमालोक्यते ॥३५॥

टीका—संसृतिकानने संसारवने जनतरुः लोकवृक्षः जातः उत्पन्नः किंलक्षणः जनतरुः संपच्चारुलतः विभूतिलतायुक्तः । पुनः किंलक्षणः जनतरुः प्रियास्त्रीवल्लीभिः आलिंगितः। पुनः किंलक्षणः जनतरुः पुत्रादिप्रियपल्लवः । पुनः किंलक्षणः रतिसुखप्रायैः फलैः आश्रितः । ईदृग्विधः जनतरुः चेत् कालोग्रदावानलव्याप्तः न भवेत् तदा बत इति खेदे बुधैः पंडितैः अन्यत् किं आलोक्यते न किमपि ।

अर्थ—आ संसाररूपी वनमां लोकरूपी वृक्ष पेदा थयोछे; अने ते संपत्तिरूपी वेलीकरि संयुक्त छे. वळी स्त्रीरूपी वेलीथी वींटायलो छे. तथा पुत्रादिक संततीरूपी जेनां पानडां छे. अने तेने रतिसुखरूपी घणां फळ आवेलां छे. एहवो वृक्ष छे तेने काळरूपी दावानल अग्नी

जो न लागतो होय तो पछे शूं जोइये? अने ज्ञानीजन बीजूं सुख पण शामाटे खोळे?

वांछत्येव सुखं तदत्र विधिना दत्तं परं प्राप्यते
नूनं मृत्युमुपाश्रयंति मनुजास्तत्राप्यतो बिभ्यति ॥
इत्थं कामभयप्रसक्तहृदया मोहान्मुधैव ध्रुवं
दुःखोर्मिप्रचुरे पतंति कुधियः संसारघोरार्णवे ॥ ३६ ॥

टीका—अत्र संसारे मनुजाः मनुष्याः सुखं वांछंति। तत्सुखं परं केवलं विधिना कर्मणा दत्तं प्राप्यते। तत्र संसारे नूनं निश्चितं मृत्युं उपाश्रयंति प्राप्नुवंति। अतः मृत्योः सकाशात् बिभ्यति भयं कुर्वंति। इत्थं अमुना प्रकारेण कामभयप्रसक्त आसक्तहृदयाः लोकाः कुधियः निंद्यबुद्धयः मोहात् मुधैव वृथैव ध्रुवं संसारघोरार्णवे समुद्रे पतंति। किंलक्षणे संसारसमुद्रे दुःखोर्मिप्रचुरे दुःखलहरीभृते।

अर्थ—आ संसारमा हरएक माणस सुखनी वांछा करेछे. अने ते सुख जेनां तेनां कर्म प्रमाणे प्राप्त थायछे. संसारमां मृत्यू तो थवानो छे ए वात नक्की छतां लोको ते मृत्यूथी बिहेछे. एहवी रीते सुखनी वांछाथी अने मरणना भयथी चित्त आसक्त करीने मूरख लोक मोहना लीधे आ दुःखरूपी लेहेरीयोथी भरेलां संसाररूपी भयंकर समुद्रमां पडेछे.

स्वसुखपयसि दिव्यन्मृत्युकैवर्तहस्त-
प्रसृतघनजरोरुप्रोल्लसज्जालमध्ये ॥
निकटमपि न पश्यत्यापदां चक्रमुग्रं
भवसरसि वराको लोकमीनौघ एषः ॥ ३७ ॥

टीका—एषः वराकः लोकमीनौघः लोकमत्स्यसमूहः भवसरसि संसारसरोवरे मृत्युयमधीवरहस्तेन प्रसारितजराउग्रप्रोल्लसज्जाल-

मध्ये स्वसुखपयसि इंद्रियसुखजले दिव्यन् क्रीडन् उग्रं आपदां चक्रं समूहं निकटं अपि न पश्यति ।

अर्थ—आ लोकरूपी माछलानो समुदाय संसाररूपी सरोवरमां मृत्युरूपी धीवरे फेंकेला वृद्धावस्थारूप भयंकर जाळामां इंद्रियसुखरूपी जळमां क्रीडा करतो छतो पोतानाऊपर घोर संकट नजीक आव्यूं छतां पण जोतो नथी.

शृण्वन्नंतकगोचरं गतवतः पश्यन् बहून् गच्छतो
मोहादेव जनस्तथापि मनुते स्थैर्यं परं ह्यात्मनः ।
संप्राप्तेऽपि च वार्द्धके स्पृहयति प्रायो न धर्माय य-
त्तद्बध्नात्यधिकाधिकं स्वमसकृत्पुत्रादिभिर्बंधनैः ॥३८॥

टीका -जनः लोकः अंतकगोचरं यमगोचरं गतवतः गतजीवान् शृण्वन् जीवः अंतकगोचरं बहून् गच्छतः पश्यन् तथापि मोहात् एव आत्मनः परं स्थैर्यं स्थिरत्वं मनुते । च पुनः यत् वार्द्धके संप्राप्ते अपि प्रायः बाहुल्येन धर्माय न स्पृहयति न वांछयति ततः स्वं आत्मानं पुत्रादिभिः बंधनैः असकृत् वारंवारं अधिकाधिकं बध्नाति ।

अर्थ—आ माणस घणाएक जीव मृत्यू पाम्यां एहवूं सांभळेछे अने पोताना नजरे जुवेछे. तथापि मोहने वश थई पोतानूं जीवतर एहवीज रीते कायम रहेशे एम मानेछे! वळी वृद्धापकाळ आव्यो तो पण वैराग्यनी इच्छा करतो नथी, अने पोतानां पुत्रादिकना बंधनमां वधारे वधारे बंधायछे.

दुश्चेष्टाकृतकर्मशिल्पिरचितं दुःसंधिदुर्बंधनं
सापायस्थितिदोषधातुमलवत्सर्वत्र यन्नश्वरं ॥
आधिव्याधिजरामृतिप्रभृतयो यच्चात्र चित्रं न त-
च्चित्रं स्थिरता बुधैरपि वपुष्यत्रापि यन्मृग्यते ॥३९॥

टीका—यत् शरीरं दुश्चेष्टाकृतकर्मशिल्पिरचितं पापकर्म शिल्पी विज्ञानी तेन रचितं। यत् शरीरं दुःसंधिदुर्बंधनं। यत् शरीरं सापायस्थिति। यत् शरीरं सर्वत्र दोषधातुमलवत् मलभृतं। यत् शरीरं नश्वरं विनश्वरं अस्ति। अत्र संसारे यत् आधिः मानसीव्यथा व्याधिः शरीरव्यथा जरामृतिमरणप्रभृतयः बहवः रोगादयः संति तत् चित्रं न अस्ति। बुधैः भव्यैः अपि अत्र वपुषि शरीरे यत् स्थिरता मृग्यते अवलोक्यते तत् चित्रं आश्चर्यं।

अर्थ—आ शरीर पापकर्मरूपी शिल्पिकारे बनावेलूं छे. जुवो, आ शरीरना सांधा अने बांधा केटलां नबळां छे? वळी तेने बगडतां पण वार नथी. आखां शरीरमां खराब धातू अने मलमूत्र भरेलां छे. आ शरीर नाशवंत छे. तेनालीधे आ संसारमां जे मानसिक दुःख अने शारीरिक पीडा तथा वृद्धावस्था, मरण अने घणा एक रोग, विगेरे होय तेमां कांई आश्चर्य नथी. पण आश्चर्य तो एछे जे एहवां नाशवंत शरीरना विषे समजू लोकोभी स्थिरता धारेछे.

लब्धा श्रीरिह वांछिता वसुमती भुक्ता समुद्रावधिः
प्राप्तास्ते विषया मनोहरतराः स्वर्गेपि ये दुर्लभाः ॥
पश्चाच्चेन्मृतिरागमिष्यति ततस्तत्सर्वमेतद्विषा
श्लिष्टं भोज्यमिवातिरम्यमपि धिग्मुक्तिः परं मृग्यतां ॥

टीका—इह संसारे श्रीः लक्ष्मीः लब्धा। वांछिता वसुमती समुद्रावधिः भुक्ता। ते विषया मनोहरतराः प्राप्ताः ये विषयाः स्वर्गेऽपि दुर्लभाः चेत्पश्चान्मृतिः आगमिष्यति। ततः कारणात् एतत्सर्वं रम्यं सुखं अपि धिक्। किंलक्षणं सुखं विषाश्लिष्टं भोज्यं इव। परं केवलं मुक्तिः मृग्यतां विचार्यतां।

अर्थ—आ संसारमां लक्ष्मी प्राप्त थई, समुद्रपर्यंत पृथ्वीनुं राज्य भोगव्यूं, अने स्वर्गमाबी भोगववा नहीं मळे एहवां रळियामणा विषयसोप मळ्यां; पण आखरे मरवानूं छेज. वास्ते आ बधां रळिया-

मणा सुखने धिक्कार छे. कारण एहवूं सुख तो विष मेळवेलां भोजन जेवूं केहेवाय. माटे मुक्ती जे छे तेच साचूं सुख छे एम समजवूं.

युद्धे तावदलं रथेभतुरगा वीराश्च दृप्ता भृशं
मंत्राः शौर्यमसिश्च तावदतुलाः कार्यस्य संसाधकाः ॥
राज्ञोऽपि क्षुधितोऽपि निर्दयमना यावज्जिघत्सुर्यमः
क्रुद्धो धावति नैव सन्मुखमितो यत्नो विधेयो बुधैः ॥

टीका–राज्ञः रथेभतुरगाः तावत् युद्धे संग्रामे अलं समर्थाः। वीराः च भृशं अत्यर्थं तावत् दृप्ताः सगर्वाः संति। मंत्राः तावत् स्फुरंति। शौर्यं च असिश्च खड्गः तावत् कार्यस्य संसाधकाः तावत् संति यावत् यमः क्रुद्धः क्रोधं प्राप्तः सन्मुखं नैव धावति। किंलक्षणः यमः क्षुधितः। पुनः अतिनिर्दयमनः। पुनः किंलक्षणः यमः जिघत्सुः ग्रसितुं इच्छुः जिघत्सुः बुधैः पंडितैः इतः यमात् यत्नः विधेयः कर्तव्यः।

अर्थ—ज्यारसुधी यमराज क्रोधाविष्ट थईने सामो दोड्यो नथी तारसुधीज युद्ध संग्रामनाविषे राजाना रथ, हाथी, घोडा पोतानूं बळ बतावेछे; अने वीर योद्धा पण तारसुधीज गर्व राखेछे; अने मंत्रशक्ति पण तारसुधीच चाले छे; शौर्य अने तरवार पण तेटलीज वखत सुधी काम बजावेछे. कारण आ यमराज एटले काळ जे छे ते महानिर्दय अने भूख्यो छे. तेने खाऊं खाऊं करवानीज इच्छा छे. वास्ते ज्ञानी माणसे काळथी बचवानो प्रयत्न करवो.

राजापि क्षणमात्रतो विधिवशाद्रंकायते निश्चितं
सर्वव्याधिविवर्जितोपि तरुणोप्याशु क्षयं गच्छति ॥
अन्यैः किं किल सारता मुपगते श्रीजीविते द्वे तयोः
संसारे स्थितिरीदृशीति विदुषा क्वान्यत्र कार्यो मदः ४२

टीका—राजा अपि विधिवशात् कर्मवशात् क्षणतः क्षणमात्रतः निश्चितं रंकायते रंकइव आचरति । सर्वव्याधिविवर्जितः अपि तरुणः आशु क्षयं गच्छति ! अन्यैः किं किलइति सत्ये श्रीजीविते द्वे सारतां उपागते तयोः द्वयोः श्रीजीवितयोः ईदृशी स्थितिः इति ज्ञात्वा विदुषा पंडितेन अन्यत्र क कस्मिन् विषये मदः कार्यः अपितु मदः न कर्तव्यः ।

अर्थ—राजा छे तो पण तेभी कर्मना वशथी क्षणमात्रमां रंक थई जायछे: खासो निरोगी तरुण माणस होयछे पण तेभी पलकमात्रमां मरी जायछे; त्यारे बीजानी वातज शी ? जगतमां लक्ष्मी अने जीवतर ए बेज चीजो सारमात्रछे अने ते बन्नेनी एहवी क्षणभंगुर स्थिति जोवामां आवेछे. तो वळी बीजां कयां विषयमां ज्ञानीजने गर्व करवो ? कोईभी बाबतमां गर्व करवो नहीं.

हंति व्योम स मुष्टिनात्र सरितं शुष्कांतरत्याकुल-
स्तृष्णार्तोथ मरीचिकाः पिबति च प्रायः प्रमत्तोभवन् ॥
प्रोत्तंगाचलचूलिकागतमरुत्प्रेंखत्प्रदीपोपमैर्यः
संपत्सुतकामिनीप्रभृतिभिः कुर्यान्मदं मानवः ॥ ४३ ॥

टीका—अत्र संसारे यः मानवः संपत्सुतकामिनीप्रभृतिभिः मदं गर्वं कुर्यात् । किंलक्षणैः संपत्सुतकामिनीप्रभृतिः प्रकर्षेण उत्तुंगा अचलचूलिका तस्यां गतः मरुत् तेन मरुता प्रेंखंतः ये प्रदीपास्तत्समानैः । यः मदं करोति सः मूर्खः मुष्टिना व्योम हंति मारयति। अथ आकुलः शुष्कां सरितं नदीं तरति । अथ च पुनः प्रायः बाहुल्येन प्रमत्तः भवन् तृष्णार्त्तः मरीचिकाः पिबति इति ज्ञात्वा मदः न कार्यः न कर्तव्यः ।

अर्थ—आ संसारमां जे माणस संपदा, स्त्री, पुत्र, इत्यादिनो गर्व करेछे ते मूर्ख पोतानां मुष्टीथी आकाशने ताडन करेछे; अथवा सुकायली नदीमां तरवा जायछे: किंवा उन्मत्त थयोथको तृष्णाथी पीडाईने मृगजळ पीवा दोडेछे. कारण संपदा अने स्त्री पुत्रादिक जे छे ते

ऊंचा पर्वतना शिखर ऊपर छूटेलां पवनमां मूकेलां दीवा जेवां छे. तेने नाश थतां कंई पण वार नथी, एम समझीने कोई चीजनो गर्व न करवो.

लक्ष्मीं व्याधमृगीमतीव चपलामाश्रित्य भूपा मृगाः
पुत्रादीनपरान् मृगानतिरुषा निघ्नंति सेर्ष्यं किल ।
सज्जीभूतघनापदुन्नतधनुः संलग्नसंहृच्छरं
नो पश्यंति समीपमागतमपि क्रुद्धं यमं लुब्धकं ॥४४॥

टीका–भूपाः मृगाः लक्ष्मीं व्याधमृगीं भिल्लमृगीं अतीव चपलां आश्रित्य पुत्रादीन् परान् मृगान् अतिरुषा कोपेन सेर्ष्यं ईर्षायुक्तं यथा स्यात्तथा निघ्नंति मारयंति। किल इति सत्ये क्रुद्धं यमं लुब्धकं समीपं आगतं अपि नो पश्यंति । किंलक्षणं यमव्याधं सज्जीभूत-घनापदुन्नतधनुः संलग्नसंहृच्छरं बाणं ।

अर्थ—राजाओरूपी मृग छे ते लक्ष्मीरूपी अत्यंत चपल एहवी पारधीए पकडेली मृगीने भोगवाना लालचथी पुत्र तथा भाई विगेरेरूपी बीजां मृगोने ईर्षाथी अतिशय क्रोधवान थई मारी नाखेछे. ते वखत पोताना नजीक आवीने उभो थएलो, अने हाथमा धनुष पकडीने तेने बाण चढावीने मारवामाटे तयार थएलो, एहवा काळरूपी पारधीने पण देखतां नथी.

मृत्योर्गोचरमागते निजजने मोहेन यः शोककृत्
नो गंधोपि गुणस्य तस्य बहवो दोषाः पुनर्निश्चितं ॥
दुःखं वर्द्धत एव नश्यति चतुर्वर्गो मतेर्विभ्रमः
पापं रुक्‌ मृतिश्च दुर्गतिरथ स्याद्दीर्घसंसारिता ॥४५॥

टीका–अत्र लोके निजजने मृत्योः गोचरं यमस्य गोचरं आगते सति यः मूढः मोहेन शोककृत् भवति तस्य जनस्य गुणलेशोपि गंधोपि वासनामात्रमपि नो अस्ति । पुनः निश्चितं दोषाः बहवः

संति । तस्य शोकीजनस्य दुःखं वर्द्धते । एव निश्चितं चतुर्वर्गः नश्यति । तस्य मतेर्विभ्रमः स्यात् भवेत् । तस्य पापं भवति तेन पापेन रुग् रोगः भवति । तेन रुजा मृतिः मरणं भवति । च पुनः दुर्गतिः भवति । अथ तया दुर्गत्या दीर्घसंसारिता स्यात् भवेत् ।

अर्थ—आलोकमां जे कोई मूर्ख पोतानूं माणस मरवा मांड्युं जाणीने मोहथी शोक करवा मांडेछे तेने फायदो तो लेशमात्रभी थतो नथी, पण उलटूं तेने नुकसान घणूं थायछे. ते शोक करनारानूं दुःख वधेछे. तेनां धर्म, अर्थ, काम अने मोक्ष ए चारे पुरुषार्थ बगडेछे. तेना बुद्धीमां भ्रम थई जायछे अने ते रोगथी मरण पामेछे. मूवांकेडे तेने दुर्गतीमां जवूं पडेछे अने ते दुर्गतीना लीधे घोर संसारमां भमवूं पडेछे.

आपन्मयसंसारे क्रियते विदुषा किमापदि विषादः ॥
कस्त्रस्यति संघनतः प्रविधाय चतुःपथे सदनं ॥४६॥

टीका—आपन्मयसंसारे आपदि सत्यां विदुषा पंडितेन किं विषादः क्रियते अपि तु न क्रियते । चतुःपथे सदनं गृहं प्रविधाय कृत्वा लंघनतः उपद्रवात् कः त्रस्यति कः भयं करोति अपि तु न कोपि ।

अर्थ—संसार तो दुःखथी भरेलोजछे. एहवां दुःखमय संसारमां दुःख आवीपडे तो ज्ञानी माणसे शूंकरवा खेद करवो? नहींज करवो. कारण चारे रस्तानां वचमां घर बांधीने बेशिये अने आपणूं घर कोई ओळंगशे तो तेनो शा माटे डर राखवो?

वातूल एष किमु किं ग्रहसंग्रहीतो
भ्रांतोथवा किमु जनः किमथ प्रमत्तः ॥
जानाति पश्यति शृणोति च जीवितादि
विद्युच्चलं तदपि नो कुरुते स्वकार्यं ॥ ४७ ॥

टीका–एषः जनः किमु वातूलः किंवा ग्रहेण संग्रहीतः अथवा किमु भ्रांतः अथ किं प्रमत्तः। च पुनः एषः जनः जीवितादि विग्रुचलं जानाति पश्यति शृणोति तदपि स्वकार्यं नो कुरुते।

अर्थ—आ माणसने ते कंई वायू थयोछे? के तेने कोई ग्रह वळगयोछे? अथवा ते कंई भ्रांतीमां आवी गयोछे के तेने थयूंछे शूं? अरे आ जीवतर विगेरे वीजळीना चमकारा जेवूं छे एहवूं ते जाणेछे, नजरे देखेछे, अने सांभळेछे तो पण पोतानूं स्वहित करतो नथी!

दत्तं चौषधमस्य नैव कथितः कस्याप्ययं मंत्रिणो
नो कुर्याच्छुचमेवमुन्नतमतिर्लोकांतरस्थे निजे।
यत्ना यांति यतोऽगिनः शिथिलतां सर्वे मृतेः सन्निधौ
बंधाश्चर्मविनिर्मिता परिलसद्वर्षांबुसिक्ता इव ॥ ४८ ॥

टीका–उन्नतमतिः ज्ञानवान् निजे इष्टे लोकांतरस्थेसति मृतेसति एवं शुचं शोकं नो कुर्यात्। एवं कथं अस्य रोगिणः पुरुषस्य औषधं नो दत्तं अयं कस्यापि मंत्रिणः नैव कथितः एवं शुचं शोकं नो कुर्यात्। यतः अंगिनः जीवस्य मृतेः यमस्य सन्निधौ समीपे सर्वे यत्नाः शिथिलतां यांति। यथा चर्मविनिर्मिता बंधाः परिलसद्वर्षांबुसिक्ता इव जलेन सिक्ताः चर्मबंधाः शिथिलतां यांति।

अर्थ—डाह्या माणसे पोतानूं माणस गुजरी जवाथी, "अरेरे हूं तेने दवा आपी नहीं! के कोई मांत्रिकने कह्यूं नहीं," एहवो शोक करवो नहीं. कारण के आ जीवने काळ आवी पोंहच्यो एटले सघळां प्रयत्न फोकट जायछे. जेम चामडानां मजबूत बांधेला बंध होयछे तोपण तेना ऊपर पाणी छांटयाथी ते पण ढीलां थई जायछे; तेम.

स्वकर्मव्याघ्रेण स्फुरितनिजकालादिमहसा
समाघ्रातः साक्षाच्छरणरहिते संसृति वने ॥

प्रिया मे पुत्रा मे द्रविणमपि मे मे गृहमिदं
वदन्नेवं मे मे पशुरिव जनो याति मरणं ॥४९॥

टीका–जनः लोकः संसृतिवने संसारवने स्वकर्मव्याघ्रेण साक्षात् समाघ्रातः ग्रहीतः मरणं याति। किंलक्षणे संसारे शरणरहिते। किंलक्षणेन स्वकर्मव्याघ्रेण स्फुरितनिजकालादिमहसा । एवं वदन् मरणं याति । एवं कथं प्रिया मे पुत्रा मे द्रविणमपि मे इदं गृहं मे एवं वदन् पशुरिव अजारिव मरणं याति ।

अर्थ—आ संसाररूपी अरण्यमां आ माणसरूपी एक बकरानूं बच्चूं छे तेने पोतानां कर्मरूपी वाघे तहां पकडवाथी ते "मे मे" शब्द एटले माहरी बइरी, माहरां छोकरां, माहरां पइसा, माहरूं घर एहवां पोकार करतूं मरण पामेछे. तेने आ संसारमां पोतानां कर्मरूपी विकाळ वाघनां मोढांमाथी छोडाववा कोई शरण नथी.

दिनानि खंडानि गुरूणि मृत्युना
विहन्यमानस्य निजायुषो भृशं ॥
पतंति पश्यन्नपि नित्यमग्रतः
स्थिरत्वमात्मन्यभिमन्यते जडः ॥ ५० ॥

टीका–निजायुषः गुरूणि वहुतराणि खंडानि दिनानि नित्यं अग्रतः पतंति । किंलक्षणस्य निजायुषः मृत्युना विहन्यमानस्य यमेन पीडमानस्य । जडः मूर्खः जनः पश्यन् अपि आत्मनि विषये स्थिरत्वं अभिमन्यते ।

अर्थ—आपणा आयखानां दाहडां बहु होयछे तोपण तेमांथी एक दाडो गयो बे दाडां गयां एम कडके कडके घटतां जायछे, कारण काळ जे छे ते आयखाने घटाडतोज चाल्यो छे. एहवूं नजरे देखतो छतो पण पोताने स्थीर मानेछे, ते केवो मूरख केहेवाय?

कालेन प्रलयं व्रजंति नियतं तेपींद्रचंद्रादयः
का वार्तान्यजनस्य कीटसदृशोशक्तेरदीर्घायुषः ॥
तस्मान्मृत्युमुपागते प्रियतमे मोहं मुधा माकृथा
कालः क्रीडति नात्र येन सहसा तत्किंचिदन्विष्यतां

टीका–भो भव्याः श्रूयतां। कालेन कृत्वा ते इंद्रचंद्रादयः अपि नियतं निश्चितं प्रलयं व्रजंति । नाशं गच्छंति । अन्यजनस्य का वार्ता। किंलक्षणस्य अन्यजनस्य कीटसदृशः पतंग समानस्य । पुनः किंलक्षणस्य अशक्तेः असमर्थस्य । पुनः किंलक्षणस्य अन्यजनस्य अदीर्घायुषः स्तोकायुर्जनस्य । तस्मात् कारणात् प्रियतमे इष्टे जने मृत्युं उपागते सति मुधा वृथा मोहं माकृथाः सहसा तत्किंचित् अन्विष्यतां। येन आत्मावलोकनेन अत्र शरीरे कालः न क्रीडति ।

अर्थ—हे भव्यप्राणीओ तमे सांभळो. आ काळना लीधे इंद्र, चंद्र इत्यादिक पण निश्चयेकरी नाश पामेछे. तारे बीजानी वात शी? कारण बीजा जीव तो पतंग जेवां छे, अशक्त छे, अने थोडां आयखांवाळां छे. वास्ते कोई वाहलूं मरी जवाथी वगरकामनो मोह करीश नहीं. अने एहवूं कांई आत्मावलोकन कर के एनाथी आ शरीर काळना सपाटामां नहीं आवे.

संयोगो यदि विप्रयोगविधिना चेज्जन्मतन्मृत्युना
संपच्चेद्विपदासुखं यदि तदा दुःखेम भाव्यं ध्रुवं ॥
संसारेण मुहुर्मुहुर्बहुविधावस्थांतरप्रोल्लस-
द्वेषान्यत्वनटीकृतांगिनि सतः शोको न हर्षः क्वचित् ॥

टीका–अत्र संसारे ध्रुवं निश्चितं यदि सुखं अस्ति तदा दुःखेन भाव्यं व्याप्तं अस्ति । चेत् यदि संपत् अस्ति तदा विपदा भाव्यं अस्ति । अत्र संसारे यदि चेत् जन्म तत् जन्म मृत्युना भाव्यं व्याप्तं । अस्मिन् चेत् संयोगः इष्टमिलनं अस्ति तदा विप्रयोगवि-

धिना वियोगेन व्याप्तं पीडितं अस्ति । किंलक्षणे संसारे मुहुर्मुहुः वारंवारं बहुविधं अवस्थांतरं प्रोल्लसत् वेषान्यत्वनटीकृतांगिनि बहुविधगत्यांतरवेषैः नर्तितजीवगणे। मतः सत्पुरुषस्य क्वचित् काले शोको न कार्यः हर्षः न कार्यः ।

अर्थ—आ संसारमां जो कंईभी सुख हशे तो ते दुःखथी वींटायलूं हशेज. जो संपत्ति हशे तो तेना साथे विपत्तीपण रहेशेज. आ संसारमां जे जनम पामेछे तेनां पछवाडे मृत्यू वळगेलो छेज. जहां इष्ट संयोग छे तहां वियोग पण छे. आ संसारमां वारंवार नाना प्रकारनी गतीजाति अवस्थारूप वेष लेई नाचनारा बहुरूपी जेवी स्थिती छे. वास्ते सारा माणसें कोई काळे शोक करवो नहीं तेम हरखपण करवो नहीं.

लोकाश्चेतसि चिंतयंत्यनुदिनं कल्याणमेवात्मनः
कुर्यात्सा भवितव्यता गतवती तत्तत्र यद्रोच्यते ॥
मोहोल्लासवशादतिप्रसरतो हित्वा विकल्पान् बहून्
रागद्वेषविषोज्झितैरिति सदा सद्भिः सुखं स्थीयतां

टीका—रागद्वेषरहितैः सद्भिः चतुरैः सदाकाले सुखं स्थीयतां तिष्ठतां इति विकल्पात् बहून् हित्वा त्यक्त्वा । किंलक्षणान् विकल्पान् मोहोल्लासवशात् मोहप्रभावात् अतिप्रसरतः । लोकाः जनाः चेतसि विषये अनुदिनं दिनं प्रति आत्मनः कल्याणं एव चिंतयंति सा आगतवती भवितव्यता तत्र लोकरोचने यद्रोच्यते तत् कुर्यात् ।

अर्थ—माणस पोताना हितनांमाटेज चिंता करेछे पण तेने भवितव्यताप्रमाणे जेटलूं प्राप्त थवानूं तेटलूंज प्राप्त थायछे. वास्ते मोहना सबबथी वधारे वधेलां अनेक विकल्प मूकी देई रागद्वेषरहित चतुर पुरुषोए सदाकाळ संतोषमां रहेवूं.

लोकाग्रहप्रियतमासुतजीवितादि-
वाताहतध्वजपटाग्रचलं समस्तं ॥

व्यामोहमत्र परिहृत्य धनादि मित्रे
धर्मे मतिं कुरुत किं बहुभिर्वचोभिः ॥५४॥

टीका—भो लोकाः गृहप्रियतमा स्त्री सुतपुत्रजीवितादि वातेन पवनेन आहतं पीडितं ध्वजपटाग्रं तद्वत् चलं चपलं विजानीत। अत्र धनादिषु धनादि मित्रे व्यामोहं परिहृत्य त्यक्त्वा धर्मे मतिं कुरुत। बहुभिः वचोभिः किं न किमपि।

अर्थ—हे भाईयो, आ घर, स्त्री, पुत्र, जीवतर इत्यादि बधूं पवनथी अथडाती ध्वजाना कपडा जेवूं चंचळ समजजो. अने धनादि मित्रना विषें मोह मूकी देई धर्म उपर चित्त लगाडो एटले बस्स छे; वधारे शूं कहेवूं?

पुत्रादिशोकशिखिशांतिकरी यतींद्र-
श्रीपद्मनंदिवदनांबुधरप्रसूतिः॥
सद्बोधसस्यजननी जयतादनित्य-
पंचाशदुन्नतधियाममृतैकवृष्टिः॥ ५५॥

टीका—अनित्यपंचाशत् जयतात्। किंलक्षणा अनित्यपंचाशत्। उन्नतधियां उन्नतबुद्धीनां अमृतैकवृष्टिः। पुनः किंलक्षणा अनित्यपंचाशत् पुत्रादिशोकाग्निशांतिकरी। पुनः किंलक्षणा अनित्यपंचाशत् यतींद्रश्रीपद्मनंदिवदनांबुधरःमेघः तस्मात् प्रसूतिः उत्पना। पुनः किंलक्षणा अनित्यपंचाशत् सद्बोधसस्यजननी बोधधान्यजन्मभूमिः।

अर्थ—आ अनित्यपंचाशत् जयवंत हज्यो. ते केवूं छे के, श्रीपद्मनंदि आचार्यना मुखरूपी मेघथी निकळेलूं छे; तेथी उत्तम बुद्धीवाळा माणस ऊपर अमृतनी वृष्टी करेछे. अने पुत्रादिकना वियोगथी उपजेलां शोकने शांत करनारूं छे. बोधरूपी अनाज उपजावनारी जन्मभूमीज छे.

इति श्रीअनित्यपंचाशत् संपूर्णा.

भावार्थ लखनारनी प्रार्थना.

आ अनित्यपंचाशत् श्री पद्मनंदिपंचविंशति नामना सर्वमान्य पुस्तकमां तेनी संस्कृत टीकासहित छे. तेनूं अमे गुजरातीमां भावार्थ लखीने तेसाथे प्रसिद्ध कऱ्यो छे. मरणना लीधे तथा बीजा कारणोथी उपजेलो शोक मटाडवानेमाटे ए घणो बोध आपेछे. गुजराती लोकोमां मरणना पछवाडे रोवा कूटवानो नठारो रिवाज चालेछे ते एनां हमेश वांचवा सांभळवाथी निकळी जशे. अने एनो गुजराती भाषामां भाषांतर करवानो अमारो हेतु पण तेज छे. मरणना पछवाडे दस दाडासुधी वैष्णव लोकोमां जेम गरुडपुराण सांभळवानो रिवाज छे तेम अमारा जैनी भाईयो अगियार दाडासुधी आ अत्यंत समाधान आपनारूं अनित्यपंचाशत् दररोज पांच पांच श्लोक सांभळतां जशे तो तेनांथी शोकनो विसारो पडी तेमनां मनने स्थिरता मळशे. अने अतिशय शोक करवाथी असातावेदनीय कर्मनो बंध पडी आ भवमां तथा बीजा भवमां जे दुःख भोगववूं पडेछे, ते एनाथी मटशे.

सोलापूर,
ता. ५ जानेवारी १९११.

हिराचंद नेमचंद,
सोलापूर.